# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

<table>
<tr><td>कक्षा – आचार्यप्रथमवर्षम् (SEM-1)</td><td rowspan="3">प्रश्नपत्रम् – ४<br>(CC-4.1.3 New & Old)<br>सन्दर्भग्रन्थः ब्रह्मसूत्रशाङ्करभाष्यम्<br>(प्रथमाध्याये ईक्षत्यधिकरणं यावत् )</td><td rowspan="2">गुणाः – ७०</td></tr>
<tr><td>विषयः – सर्वदर्शनम्</td></tr>
<tr><td>दिनाङ्कः -१८/१२/२०१८</td><td>समयः -०२.०० तः ०५.००</td></tr>
</table>

**प्रथमान्वितिः**

**प्रश्नः १ कस्यचिद् एकस्य प्रश्नस्य व्याख्यात्मकम् उत्तरं लिखत।** ( ०५ )

(१) *युष्मदस्मत्प्रत्ययगोचरयोः परस्परम् अध्यासः किमर्थं मिथ्या भवितुम् अर्हति ?*

(२) *अविद्यावद् विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च कथं भवतीति यथाभाष्यं लिखत।*

**प्रश्नः २ कस्यचिद् एकस्य प्रश्नस्य निबन्धात्मकम् उत्तरं लिखत।** ( १० )

(१) *अध्यासलक्षणं यथाभाष्यं विशदयत।*

(२) *ख्यातिवादविमर्शं कृत्वा अनिर्वचनीयख्यातिं प्रतिपादयत।*

**द्वितीयान्वितिः**

**प्रश्नः ३ कस्यचिद् एकस्य प्रश्नस्य यथाभाष्यं व्याख्यात्मकम् उत्तरं लिखत।** ( ०५ )

(१) *''ब्रह्मजिज्ञासा'' इति पदस्य समासार्थं लिखत।*

(२) *धर्मब्रह्म – जिज्ञासयोः फलभेदं लिखत।*

**प्रश्नः ४ कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ( १० )

(१) *जिज्ञासाधिकरणस्य सारांशं लिखत।*

(२) *आत्मविषये ब्रह्मसूत्रेषु वर्णितानि विभिन्नानि मतानि विवृणुत।*

**तृतीयान्वितिः**

**प्रश्नः ५ कस्यचिदेकस्य प्रश्नस्य यथाभाष्यं व्याख्यात्मकम् उत्तरं लिखत।** ( ०५ )

(१) *ब्रह्मणः सर्वज्ञत्वं वितनुत।*

(२) *ब्रह्मणः अनुमानगम्यत्वं निराकुरुत।*

**प्रश्नः ६ कस्यचिदेकस्य प्रश्नस्य निबन्धात्मकम् उत्तरं लिखत।** ( १० )

(१) *जन्माद्यधिकरणस्य सारांशं लिखत।*

(२) *शास्त्रयोनित्वाधिकरणस्य सारांशं स्वशब्दैः निबध्नीत।*

## चतुर्थान्विति:

**प्रश्न: ७ कस्यचिदेकस्य प्रश्नस्य यथाभाष्यं व्याख्यात्मकम् उत्तरं लिखत ।** **( ०५ )**

*(१) ''गौणश्चेन्नात्मशब्दात्'' इति सूत्रार्थ: ।*

*(२) ''तन्निष्ठस्य मोक्षोपदेशात्'' इति सूत्रार्थ: ।*

**प्रश्न: ८ कस्यचिद् एकस्य प्रश्नस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) वेदान्तावाक्यानां विधिशेषत्वं निराकृत्य सर्वेषां वेदान्तानाम् अद्वितीये ब्रह्मणि समन्वयं दर्शयत ।*

*(२) अचेतनकारणवादं निराकुरुत ।*

**प्रश्न: ९ केषाञ्चन दशप्रश्नानाम् अतिलघूत्तरात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) अस्मत्प्रत्ययगोचर: क: ?*

*(२) ब्रह्मसूत्रेषु प्रथमाध्यायस्य नाम किम् ?*

*(३) अप्रत्यक्षेऽपि आकाशे बाला: किमध्यस्यन्ति ?*

*(४) कस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्ति: ?*

*(५) को नाम विवेक: ?*

*(६) धर्मज्ञानस्य फलं किम् ?*

*(७) ''अथातो ब्रह्म जिज्ञासा'' इत्यत्र अथशब्दार्थ: क: ?*

*(८) का नाम जिज्ञासा ?*

*(९) यास्कमते कति भावविकारा: पठिता: ?*

*(१०) सर्वज्ञकल्पस्य ऋग्वेदादे: योनि: किम् ?*

*(११) अक्रियार्थत्वात् वेदान्तवाक्यानाम् आनर्थक्यं के वदन्ति ?*

*(१२) ब्रह्मण: कविविधं रूपं वेदान्तेषु श्रूयते ?*

*(१३) प्रधाने ईक्षणं किमर्थं न भवितुम् अर्हति ?*

*(१४) ब्रह्मसूत्रेषु कति अध्याया: सन्ति ?*

*(१५) ब्रह्मसूत्रकार: क: ?*

---ooo---